## ज ब ग ड द श्। (मा.सू. १०)

ज ब ग ड द इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति[1] षड्भिः। 'भोभगोअघोअपूर्वस्य योऽशि' (८.३.१७/१६७) इत्यकारेण। 'हशि च' (६.१.११४/१६६) इति हकारेण। 'नेड्वशि [2]कृति' (७.२.८/२९८१) इति वकारेण। 'झलां जश् झशि' (८.४.५३/५२) इति जकार-झकाराभ्याम्। 'एकाचो बशो भष् झषन्तस्य [3]स्ध्वोः' (८.२.३७/३२६) इति बकारेण॥

## ख फ छ ठ थ च ट त व्। (मा.सू. ११)

ख फ छ ठ थ च ट त इत्येतान् वर्णानुपदिश्यान्ते[4] वकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवत्येकेन। 'नश्छव्यप्रशान्' (८.३.७/१४०) इति छकारेण। खफग्रहणमुत्तरार्थम्॥

## क प य्। (मा.सू. १२)

क प इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति चतुर्भिः। 'अनुस्वारस्य ययि परसवर्णः' (८.४.५८/१२४) इति[5] यकारेण। 'मय उञो वो[6] वा' (८.३.३३/१०८) इति मकारेण। 'झयो होऽन्यतरस्याम्' (८.४.६२/११९) इति झकारेण। 'पुमः खय्यम्परे' (८.३.६/१३९) इति खकारेण॥

## श ष स र्। (मा.सू. १३)

श ष स इत्येतान् वर्णानुपदिश्य पूर्वांश्चान्ते रेफमितं करोति [7]प्रत्याहारार्थम्। तस्य ग्रहणं भवति पञ्चभिः। 'यरोऽनुनासिकेऽनुनासिको वा' (८.४.४५/११६) इति यकारेण। 'झरो झरि सवर्णे' (८.४.६५/७१) इति झकारेण। 'खरि च' (८.४.५५/१२१) इति खकारेण। 'अभ्यासे चर्[8] च' (८.४.५४/२१८२) इति [9]चकारेण। '[10]शर्पूर्वाः खयः' (७.४.६१/२२५९) इति शकारेण॥

## ह ल्। (मा.सू. १४)

ह इत्येकं[11] वर्णमुपदिश्य पूर्वांश्चान्ते लकारमितं करोति प्रत्याहारार्थम्। तस्य ग्रहणं भवति षड्भिः। 'अलोऽन्त्यात् पूर्व उपधा' (१. १. ६५/२४९) इति अकारेण। 'हलोऽनन्तराः संयोगः' (१. १. ७/३०) इति हकारेण। 'लोपो व्योर्वलि' (६. १. ६६/८७३) इति वकारेण। 'रलो व्युपधाद्धलादेः संश्च' (१. २. २६/२६१७) इति रेफेण। 'झलो झलि' (८. २. २६/२२८१) इति झकारेण। 'शल इगुपधादनिटः क्सः' (३. १. ४५/२३३६) इति शकारेण।

अथ [12]किमर्थमुपदिष्टोऽपि[13] हकारः पुनरुपदिश्यते? कित्त्व[14] विकल्प-क्स-इड्विधयो यथा स्युः इति। स्निहित्वा, स्नेहित्वा इत्यत्र 'रलो व्युपधाद्धलादेः संश्च' (१. २. २६/२६१७) इति कित्त्वं वा यथा स्यात्। लिहेः

---

1. भवति नास्ति ड. 2. कृति नास्ति ड ह. 3. झोः ह. 4. पूर्वांश्चान्ते चांद्र 1/8. 5. इति नास्ति ह. 6. वो नास्ति ह. 7. प्रत्याहारार्थम् नास्ति फ. 8. चरु च ह. 9. चकारेण नास्ति ह. 10. शर्पूर्वायाः खयः क. 11. इत्यन्तं ग, इति वर्णम् फ. 12. किमर्थमयम् ड. ई. 13. अपि नास्ति ग. फ. 14. कित्त्वसेट्° ब. ड. फ. ई.